© 2018 IJSRST | Volume 4 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# आधुनिकमनोवैज्ञानुसारेण संवेगानां स्वरूपम्



डॉ. कृष्णकान्त तिवारी
सहायकाचार्य (संविदा)
राष्ट्रियसंस्कृतसंस्थानम्
भोपाल परिसरः, भोपालम्

शोधालेखसारः – मनुष्येषु सम्भवतः न्यूरोकाटकल द्वाइपोथेलेमिक–अन्तर्सम्बन्धानां महत्त्वं संवेगात्मकप्रक्रियासु भवति। उदोलन संप्रत्यय–संवेगात्मकसम्बन्धयोर्मध्ये सक्रियकरण व्यवस्था रूपेण कार्यं करोति।किशोरावस्थायां संवेगास्तीव्राः भवन्ति। तेष्वस्थिरता छत्राणां विकासे बाधिका भवितुमर्हति। संवेगात्मकप्रज्ञा विकासस्य ज्ञानेन किशोराणां संवेगानामार्गान्तरीकरणं दमनं निषेधं वा कर्तुं शक्यते। एतेन तेषां सकारात्मकेषु संवेगेषु सक्रियतायाः विकासो भवति।

मुख्य शब्दः– सुख, दुःख,स्नेह, चिन्ता, न्यूरोकाटकल, द्वाइपोथेलेमिक, मनोवैज्ञानिकः।

मनोवैज्ञानिकैः स्वीक्रियते यत् बालकेषु जन्मतः एव असंक्षिप्तोत्तोजना विद्यन्ते।इयमेव उत्तेजना साहचर्य विभेदीकरणाधारेण परिस्थितेषु सत्सु सम्बन्धितं भूत्वा गत्यात्मकानुक्रिया स्वरूपे संवेग रूपेण व्यापनोति। अयमेवभावः सुख दुःख–स्नेह–चिन्ता आदिभिः सह तादात्मीकरणस्याधारः कथ्यते। मनोवैज्ञानिकमतानुसारेण संवेगानां सम्बन्धः मूलप्रवृत्तिभिरेव। मूलप्रवृत्तयः तु चतुर्दश भवन्ति, यथाक्रोध–घृणावात्सल्यकरूणा–भय–कामुकता आश्चर्य आत्महीनता–आत्माभिमानम् एकान्त–बुभुक्षा–अधिकार–भावना–तितिक्षाभाव–आमोदादयः।केचन मनोवैज्ञानिकाः संवेगानामुत्पत्तेः विषये वदन्ति यत् एतेषां प्रक्रिया विकासात्मक– यन्त्ररचनावत् वर्तते।हार्लो महोदयेन नवजातशिशोः प्रारम्भिकजीवने इन्द्रियबोध सम्बन्धानामाधारेण संवेगानामुत्पतिरिति स्वीक्रियते। बोल्बे महोदयेन मातृत्वविलगीकरणमिति कथ्यते।व्यवहारवादिनैस्तु संवेगानामुत्पत्तेः विषये अधिगमक्रियाणां रूपेण प्राचीनानुबन्धनं स्वीक्रियते। आइजेन्क महोदयः अधिगमयोग्यतां महत्वं प्रददाति।गोल्डस्टेन महोदयानुसारेण संवेगात्मकव्यवहारे अनेक न्यूरोलांजिकल संरचना परिभ्रमणकाले सम्बन्धिताः भवन्ति।पपेज अनेका संवेगात्मकसिद्धान्ताः प्रतिपादिताः एतेषामनुसारेण संवेगाः लिमविक अवस्थायाः सम्बन्धिताः दृश्यन्ते। मनुष्येषु सम्भवतः न्यूरोकाटकल द्वाइपोथेलेमिक–अन्तर्सम्बन्धानां महत्त्वं संवेगात्मकप्रक्रियासु भवति। उदोलन संप्रत्यय–संवेगात्मकसम्बन्धयोर्मध्ये सक्रियकरण व्यवस्था रूपेण कार्यं करोति। डफी महोदयेन सक्रियकरणव्यवस्था–लिमविकव्यवस्थयोर्मध्ये भेदः स्वीक्रियते। यद्यपि द्वौ अपि सम्प्रत्ययौ दैहिकरूपेण सम्बन्धितौ वर्तेते। तथापि संप्रत्यात्मकरूपेण भिन्न वक्तुं शक्यते। अवस्थानुसारेण संवेगः संवेगेषु शारीरिकं परिवर्तनम्–अत्र प्रायः बाह्यपरिवर्तनम् एवं आन्तरिकनपरिवर्तनञ्च प्रमुखे आस्ताम्।

**(1) ब्राह्यपरिवर्तनम् –**

(अ) मुखाकृतौपरिवर्तनम्।
(ब) स्वरे परिवर्तनम्।
(स) शारीरिकमुद्रायां परिवर्तनम्।

**(2) आन्तरिक परिवर्तनञ्च**

(क) हृदयस्थ स्पन्देषु परिवर्तनम्।

(ख) रक्तचाप–नाड़ीसंस्थासु परिवर्तनम्।

(ग) त्वक् प्रत्युत्तरे परिवर्तनम्।

(घ) नाड़ीसंस्थासु परिवर्तनम्।

(ङ) ग्रन्थीयपरिवर्तनम्।

(च) मस्तिष्कतरङ्गेषु परिवर्तनम्।

(छ) पाचनक्रियासु परिवर्तनम्।

(ज) श्वासगतौ परिवर्तनम्।

**संवेगानां सिद्धान्ताः–** संवेगविषये अनेकाःसिद्धान्ताःप्रचलिताः वर्तन्ते। तेषु प्रमुखा सन्ति–

(1) जेम्य–लान्जे महोदयस्य सिद्धान्तः।

(2) कैनन–बार्ड सिद्धान्तः।

(3) प्रेरणात्मक सिद्धान्तः।

(4) संज्ञानसिद्धान्तः।

(अ) शैचटर (ब) अर्नाल्ड

**मुखाकृतौ परिवर्तनम्–**

भिन्न–भिन्न संवेगेषु व्यक्तिनां मुखाकृतयः अपि परिवर्तन्ते। यथा–

(1) पीतवर्णीयम् आननं भवति।

(2) यदा कदा रक्त वर्णीया मुखाकृतिः दृश्यते।

(3) मुखं परिशुस्यते।

(4) भ्रुकुटौ स्पन्दनं जायते।

(5) नेत्रे स्थिरता परिदृश्यते।

(6) नयनयोः सरसता आगच्छति।

(7) मुखाकृतौ शिथिलता आगच्छति।

(8) संवेगावस्थायां स्वरमात्रायां तीव्रता आगच्छति, प्रायः व्यक्तिः क्रोधसमये तीव्र स्वरेण स्नेह समये मधुरस्वरेण च वाक् व्यवहारं करोति।

(9) शारीरिकमुद्रायां परिवर्तनम् –
शारीरिक मुद्रायां मज्जापेशीय परिवर्तनं दृश्यते।

(क) आन्तिरिक परिवर्तप

**(1) हृदयस्थ स्पन्देषु परिवर्तनम्**

हृदयस्पन्देषु यत्र संकुचनं स्फोटनञ्च जायते तदा एव तत्र विद्युतीय परिवर्तनं दृश्यते, तत् मध्ये अवलोकियितुं शक्यते।

**(2) रक्तचाप परिवर्तनम्–**

एक्साइटमेंट इत्यस्मिन् रक्तचाप तः पर्यन्तं भवति। रक्तचापेत्यस्य मापनं यंत्राध्यमेन क्रियते। सामान्यतः रक्तचापः सुकरो भवति।

**(3) त्वक् प्रत्युत्तरे परिवर्तनम्**

संवेगेषु सक्रियकरण–स्तरं ज्ञातुं सर्वश्रेष्ठ सूचकं भवति। वुडबर्थ महोदयानुसारेण तः क्रियते तदा क्लेशो नास्ति।

**(4) स्पन्दनसंस्थाने परिवर्तनम्–**

तीव्रसंवेगावस्थायां व्यक्तेः सक्रियकरणम् अधिकं भवति। अतः संवेगेषु स्वतन्त्रनाडी संस्थानस्य महत्त्वं दृश्यते। सहैव इत्यस्य उच्चकेन्द्रे भवति। अतः द्वयोः महत्त्वं वर्तते। तथापि इत्यस्य पेरीफिलर डिस्ट्रीट्याशन कार्यात्मक रूपेण तः भिन्नमस्तित्त्वं भजते।''हाइपोथेलेमस इत्यस्य संवेगानां नियन्त्रणे महत्त्वपूर्णं स्थानमस्ति।

**(5) ग्रन्थीयपरिवर्तनम्**

विभिन्नसंवेगेषु एवं आदयः विभिन्नानि परिवर्तनानि दृश्यन्ते। दुःखसमये अश्रुः ग्रन्थेः सक्रियता दृश्यते। तीव्रभयस्य स्थितौ स्वेदस्रावः दृश्यते।एड्रीनलग्रन्थिना यत् स्रावं निस्रयते तत्'' उच्यते, फलस्वरूपे व्यक्तौ शौर्यगुणाः दृश्यन्ते।

**(6) मस्तिष्कतरङ्गेषु परिवर्तनम्–**

संवेगानां सक्रियकरणसिद्धान्तः मुख्यतः मस्तिष्कतरङ्गानामध्ययने आधारितः वर्तते।अस्मिन् क्षेत्रे वर्गरमहोदयस्य (डारो एवं लिण्डसले अध्ययनमधिकं महत्त्वपूर्णं वर्तते।

**(7) पाचनक्रियासु परिवर्तनम् –**

विभिन्नसंवेगेषु पाचनक्रियायाम् अपि परिवर्तनं दृश्यते। यथा दुःखसंवेगावस्थायां पाचनक्रियायां न्यूनता दृश्यते, तीव्रक्रोधासंवेगे पाचनक्रियायां तीव्रता दृश्यते।

**(8) श्वासगतौपरिवर्तनम् –**

संवेगस्यावस्थायां श्वासगतां परिवर्तनं दृश्यते। दुःखसंवेगे नाडीगतौ मन्दता अवलोक्यते। भयसंवेगे श्वासगतिः क्षणिक कालं यावत् स्थिरा भवति।

**(9) जेम्स लान्जे महोदयस्य सिद्धान्तः**

जेम्स–लान्जे महोदयस्य सिद्धान्तः सक्रियकरणस्य सिद्धान्तस्य प्राचीनाधारो वर्तते। अस्मिन् व्यक्तिः पूर्वेत्तेजकतथ्यस्य प्रत्यक्षीकरणं करोति ततः शारीरिकपरिवर्तनमनुभूयते। एतेषां परिवर्तनामाधारेणैव संवेगाः उत्पद्यन्ते।

**(10) कैनन–बार्ड महोदयस्य सिद्धान्तः**

संवेगक्षेत्रे केनन–बार्ड महोदयेन अनेकप्रयोगाणामाधारेण तमे वर्षे संवेग सिद्धान्तं प्रस्तुतम्।इमे सिद्धान्ताः एवं नाम्नः अपि ज्ञायते। जेम्सलान्जे महोदयस्य सिद्धान्तम् आंशिकरूपेण स्वीकृत्य संशोधनं कृतम्।

ततः निश्चितं यत् ''शारीरिकपरिवर्तनानामनुभूतिरेव संवेगाः भवन्ति''।जेम्सलान्जे महोदयस्यसिद्धान्तस्य स्वरूपम्–सारणीक्रमाङ्कः .

**(11) प्रेरणात्मकसिद्धान्तः**

अस्य सिद्धान्तस्य प्रतिपादकः मुख्यतः लीपर महोदयः वर्तते। अस्य सिद्धान्तस्यानुसारेण संवेगात्मकक्रियाः तथैवोद्देश्यपूर्णाः वर्तन्ते यथा प्रेरणात्मक– क्रियाः।लीपर महोदयेन स्वीकृतम् यत् सिम्पैथेटिक भागस्य स्रावकारणात् प्राणीकठिनतमं कार्यमपि कर्तुं शक्यते। यद्यपि इत्यस्य पैरा सिम्पैथेटिक शरीरस्य शक्तिं संचयति। तथाऽपि संवेगात्मकावस्थायां वर्हन्तींशक्तिं स्थरी करोति।

**(12) संज्ञानात्मकसिद्धान्तः**

अस्य सिद्धान्तस्य शैचटर, अर्नाल्ड महोदयौ द्वौ प्रवर्तकौ वर्तेते। शैचटर महोदयेन कथितं यत्येभ्यः संवेगानामनुभूतिः जायते। तेषां कारकद्वयं भवति–

– दैहिक उदोलनेन सह प्रत्यक्षीकरणम्।

– परिस्थितीनां सम्बन्धे निर्णयः (संज्ञानम्)

एतदर्थं अनेक प्रयोगात्मकमध्ययनानि कृतानि। ततः संवेगात्मकभावनानामुत्पत्तिः क्रमः आप्नोत् यथा व्यक्तेः सर्वप्रथमं संवेग–उत्पादिकाया परिस्थितेः प्रत्यक्षीकरणं करोति, प्रत्यक्षीकरणस्यफलस्वरूपे शरीरे एका अस्पोत्तेजितावस्था उत्पन्ना भवति। व्यक्तेः अस्याः शारीरिक–अवस्थायाः नामकरणं व्याख्यामाध्यमेन करोति। सा व्याख्या प्रत्यक्षीकृत परिस्थितिभ्यः समाना भवति। एवं प्रकारेण नामकरणव्याख्योः सम्बन्धे व्यक्तेः निर्णयः एव संज्ञानमित्युच्यते। उद्दीपकःप्रत्यक्षीकरणम् शारीरिकं परिवर्तनम् संवेगस्य अनुभूतिः

''कैनन–बार्ड महोदयस्य सिद्धान्तस्वरूपम्''उद्दीपकः प्रत्यक्षीकरणम् थैलेमस हाइपोथैलेमय संवेगात्मकानुभूतिः शारीरिकपरिवर्तिनम्

यथा–

रूबेडेविस महोदयानुसारेण दशतः एकादशवर्षीयबालकाः स्वकीय आत्मप्रत्ययान् अपरजनेभ्यः तुलनां कृत्वा प्रकटयन्ति।अन्यशोधानुसारेण स्पमभवत् यत् व्यक्तेः व्यवहारः सामाजिकतत्त्वानां विभिन्नताऽपि शैक्षकणिकात्मसम्प्रत्ययान् प्रभावयति।

**संवेगात्मकप्रज्ञायाःविकासः**

मानवस्य जन्म मूलप्रवृत्तिभिः सह भवति। एतासां मूलप्रवृत्तीनां परिणतिः संवेगरूपे जायते। संवेगात्मकविकासे हर्षशोकक्रोधादिनां संवेगानामभिव्यक्तौ नियन्त्रणं विधीयते। संवेगात्मकविकासो मानववृद्धेर्विकासस्य च सर्वाधिको महत्वपूर्णपक्षो वर्तते। कस्यामवस्थायां केषां संवेगानामुत्पत्तिर्विकासश्च भवति? तेषां विवरणमत्र प्रस्तूयते।

शैशवावस्थायां संवेगात्मकप्रज्ञायाः विकासः– शिशुर्जन्मकाले उत्तेजनामनुभवति। तस्मिन् संवेगस्यानुपलब्धतां मन्यते मनोवैज्ञानिकाः। तत्क्षणं स पीडाया अनुभवङ्करोति। मासद्वयात्मकः शिशुः आनन्दस्य, पडाया उत्तेजनायाश्चानुभवैर्युक्तो भवति। तृतीये मासे शिशुः स्मितेनानन्दस्य संवेगं प्रकटयति। एतस्मिन्नेव काले स दुःखस्य प्रकटनं रुदनेन करोति। षाण्मासिकः शिशुःसारणीक्रमाङ्कः .

उद्दीपकःप्रत्यक्षीकरणम् शारीरिक्रियात्मक उदोलनम् व्याख्या संवेगस्यानुभूतिः नकारात्मकैः

भयघृणाक्रोधेर्ष्यादिसंवर्गैः समन्वितो जायते। द्वादशे मासे शिशुषु प्रेम्णः, सहानुभूतेः, आमोदस्यात्मगौरवस्य च सकारात्मकाः संवेगाः समायान्ति। वर्षद्वयात्मके शिशौ सकारात्मकनकारात्मकयोः संवेगयोर्दशनं भवति। तेषां सेवेगानाभिज्ञानमपि तत्क्षणं कतुं शक्यते।

शैशवावस्थायां संवेगात्मकाभिव्यक्तौ निरन्तरं परिषकारो दृश्यते। आरम्भे मुखमुद्राभिः शारीरिकचोभिश्च एतद् ज्ञातुं न शकयते यत् शिशुः कस्य संवेगस्याभिव्यक्तिं करोतीति? केवलं शिशोर्पितरावेव शिशोः रुदनस्य, चीत्कारस्य च प्रयोजनमवगच्छन्ति नान्ये जनाः। शनैः शनैः संवेगाः बाह्यलक्षणैरभिज्ञायन्ते। शैशवकाले संवेगाः बुभुक्षादिभिः प्रभाविताः भवन्ति। एतेषां सम्बन्ध आवश्यकताभिर्भवति।

शैशवावस्थायं संवेगास्तीव्राः भवन्ति। तेषां परिवर्तनमपि शीघ्रमेव जायते। शैशवस्थाया

अन्तिमे काले शिशुः संवेगानामभिव्यक्तिः गत्यात्मकक्रियाभिर्न सम्पाद्य भाषाप्रयोगेण कर्तुं शक्नोति। कालेऽस्मिन् शिशोः संवेगा अस्थिरा एव वर्तन्ते। एते चिरकालपर्यन्तं न भवन्ति विद्यमानाः। अत एव शिशुरश्रुपूरितैर्नेत्रैः हसनमपि कर्तुं प्रभवतिः शिशवः क्षणे तुाः क्षणेरुाः भविन्त।

बाल्यावस्थायां संवेगात्मकप्रज्ञायाः विकासः– शैशवास्थायाः परिसमाप्तिकाले शिशुषु सर्व एव संवेगाः समुत्पन्ना जायन्ते। अत एव बाल्यावस्थायां नूतनानां संवेगानां दर्शनं नैव भवति। बाल्यावस्थायां संवेगात्मकाभिव्यक्तौ परिवर्तनं नूनमेव भवति। बालकानां संवेगाः केवलं तस्य आवश्यकताभिरेन न सञ्चाल्यन्ते, ते तु वातावरणे विद्यमानैरुद्दीपकैरपि प्रभाविताः भवन्ति।

बाल्यावस्थायां बालकः स्वकीयानां वेगानामभिव्यक्तिः समुचितरुपेणैव विदधाति। बाल्यकाले संवेगात्मकस्थिरतायाः गम्भीरतायाश्च दर्शनं भवति। संवेगात्मकाभिव्यक्तये स भाषाया उपयोगं करोति। बालको मानसिकविकासकारणात् संवेगानामावेगेषु नियन्त्रणं कर्तुं शक्नोति। अत एव बाल्यावस्था हि संवेगात्मकस्थिरतायाः कालो मन्यते। अत्र बालकः संवेगात्मकदृया परिपक्वतामनुभवति। कालेऽस्मिन् बालकाः संवेगेषु नियन्त्रणं कर्तु समर्थाः भवन्ति।

किशोरावस्थयां संवेगात्मकप्रज्ञायाः विकासः

किशोरावस्था शैशवावस्थायाः पुनरावृत्तिकालरूपणे मन्यते। अत्र संवेगानामावेगेषु नियन्त्रणं कर्तुं न शक्यते। किशोरेषु संगेगात्माकमसन्तुलनं प्राप्यते। तेषु संगोत्मकं स्थिरत्वं न भवति। एतदेव कारणं यत्

किशोरावस्था झञ्झावातस्य प्रावातस्य च कालो कन्यते। एतस्यामवस्थायां यौनग्रन्थिषु क्रियात्मकताकारणात् शारीरिकशक्तिषु वृद्धिकारणाच्च बाल्यकाले विद्यमाना संवेगात्मकस्थिरता परिसमाप्यते। किशोराः संवेगात्मकदृया अस्थिराश्चञ्चलाश्च जायन्ते। शिशव इव किशोराः क्षणे तुाः क्षणे रुाश्च प्रतीयन्ते। कदाचित् किशोराः पलायनेनाक्रमेण वा कुर्वन्ति। कालेऽस्मिन् कामुकतायाः संवेग आविर्भवति प्रचण्डरूपेणाीिव्यक्तोऽपि भवति। किशोरेषु संवेगात्मिकता तीव्रता स्थिरता च प्राप्यते। तेषां सेवेगाः शीघ्रमेव परिवर्तिताः जायन्ते। तेषां संवेगाः संक्षिप्ताः भवन्ति। किशोराणां संवेगास्तेषां प्रदर्शनेन सहजरूपेणानुमीयन्ते। अत्र संवेगानां स्थले मूलप्रवृत्तीनामपि सक्रियता दृुं शक्यते।

संवेगात्मकप्रज्ञाविकासे प्रभावकाणिकारकाणि–संवेगात्मको विकासो व्यवहारध्ययनायातीव महत्त्वपूर्णं मन्यते। विकासोऽयमनेकैकोरकैर्प्रभावितो भवति। एतेषु केषाञ्चन कारकाणामुल्लेखोऽत्र प्रस्तूयते। शारीरिकविकासः स्वास्थ्यञ्च–शारीरिकविकासस्य स्वास्थस्य च संवेगात्मकविकासेन सह घनिष्ठसम्बन्धो वर्तते। आभ्यन्तरीयाः बाह्याश्च सर्वा एव शारीरिकाः न्यूनताः संवेगात्मकसमस्यानां हेतुभूताः भवन्ति। शारीरिकरूपेण विकसिताः बालकाः निर्बलानां रुग्णानाञ्च बालकानामपेक्षया संवेगात्मकदृया सन्तुलिताः भवन्ति। सन्तुलितसांवेगिकविकासाय विविधानां शारीरिकग्रन्थीनां समुचिता प्रक्रियापेक्ष्यते। एषा तु केवलं स्वस्थे, शारीरिकदृया सम्यग्विकसिते च बालके एव सम्भति। एवम्प्रकारेण शारीरिकविकासः स्वास्थ्यञ्च संवेगात्मकविकासं प्रभावयति।

मानिसिकविकासः– संवेगात्मकविकासं बालकस्य मानासिकविकासोऽपि प्रभावयति। मानासिकरूपेण विकसितो जन एव संवेगात्मकदृया विकसितो भवितुमर्हति। बालकः स्वकीयायाः बुद्धेः प्रयोगेण उचितानुचितस्य परीक्षणपूर्वकं संवेगानां प्रकाशनं कर्तुं प्रभवति। एतदेव कारणं वर्तते यत्, ये बालकाः मानसिकदृयाऽविकसिताः भवन्ति, तेषां, संवेगेषु नियन्त्रणं नैव भवति। अत एवं संवेगात्मक–परिपक्वताप्राप्त्यर्थं मानसिकविकासो हेतुरूपेण मन्यते।

वातावरणम्– वातावरणं हि भवति समग्रस्य विकासस्य हेतुभूतम्। एतन्मानसिकविकासेन सह संवेगात्मकविकासमपि प्रभावयति। वातावरणे जनानां परस्परसम्बन्धः, पारिवारिकं वातावरणं, जनेन सहान्येषां सम्बन्धादिकं सर्वमेव समायाति। एतत्सर्वं बालकस्य सांवेगिकविकासं प्रभावितं करोति। समीचीने वातावरणे बालकानां संवेगानाम् अभिव्यक्तिरपि समीचीना भवितुमर्हति। विषमे तु वातावरणे एतदन्यथा भवितुमर्हति। विद्यालयस्य वातावरणे शिक्षकाणां परस्परसम्बन्धः, तेषां छात्रैः सह सम्बन्धादिकञ्च समाविशति। बालकानामपि अन्योन्यसम्बन्धं सांवेगिकविकासं प्रभावयति। अनेकेषां संवेगानां प्रकाशनमनुकरणेनापि बालकाः कुर्वन्ति। सर्वमेतत् बालकस्य संवेगात्मकविकासं प्रभावयति। शिक्षकस्तु प्रात्यक्षरूपेण बालकस्य विकासम् प्रभावितं करोति। वस्तुतः बालकः स्वकीयैर्मित्रैः, सम्बन्धिभिः, समुदायसदस्यैः नेतृभिश्च प्रभावितो भवति। एते सर्वेऽपि तस्य संवेगात्मकविकासे प्रभावमुत्पादयन्ति। अन्ये कथं संवेगान् व्यवहारे प्रदर्शयन्तीति अवलोकनंकृत्वा बालकोऽपि तथाविधे संवेगप्रकटने तत्परो जायते। एवं परम्परया सर्व एव बालकस्य संवेगात्मकं विकासं प्रभावयन्ति।

वस्तुतः संवेगात्मकप्रज्ञाविकासस्य प्रभावकाणि तत्वानि कारकाणि वा भागद्वयं विभज्यते। प्रथमश्रेण्यां तु शारीरिकमानसिकसामाजिकादयो विकासाः समाविशन्ति, ये तु वैयक्तिकरूपेण संवेगात्मकविकासं प्रभावयन्ति। द्वितीयश्रेण्यां सामाजिकानिकारकाणि परिगण्यन्ते। एतेषु कारकेषु बालकस्य पितरौ, तस्य परिवारसदस्याः, सामाजिकाः विद्यालयजनाश्च सम्मिलितास्सन्ति। इत्थं वैयक्तिकानि साजिकानि चोभयान्यपि कारकाणि बालकस्य सांवेगिकविकासं प्रभावितं कुर्वन्ति।

संवेगात्मकप्रज्ञायाः विकासस्य शैक्षिकं महत्त्वम्ः जीवने संवेगानां विशिं महत्त्वं वर्तते। संवेगास्तु मूलप्रवृत्तिभिस्सम्बद्धाः भवन्ति। एतेषां प्रादुर्भावस्तथैव भवति यथा मानसिकशक्तीनां भवति। संवेगात्मकप्रज्ञायाः विकासेनाशयो संवेगानां देशकालानुरूपं प्रस्तुतीकरणेन वर्तते। संवेगात्मकविकासस्य शैक्षणिकं महत्त्वं मनोवैज्ञानिकैः प्रतिपादितं वर्तते।

संवेगात्मकप्रज्ञायाः विकासे प्रभावकाणां कारकाणां समुचितोपयोगो बालानां एतादृशे विकासे सहायको भवति। छात्राणं स्वास्थ्यस्य रक्षणाय शिक्षकाः परिजनाश्च संवेगात्मकविकासस्य गौरवम् अनुभूय यतन्ते। तेषां पर्यावरणं संवेगात्मकविकासानुकूलं विधातुं बालकानामध्यापका अभिभावकाश्च सक्रियाः भवितुमर्हन्ति, संवेगात्मकप्रज्ञा विकासस्य महत्त्वस्य ज्ञानेन। शिक्षकाणामभिभावकाणाञ्च बालं प्रति व्यवहारोऽपि तेषां तथाविधेविकासे सहायको भवति।

संवेगात्मकप्रज्ञाविकासस्य ज्ञानेन विद्यालये पाठयसहगामिक्रियाणामायोजने सौकर्यमनुभूयते। एतासु क्रियासु छात्रेभ्यः संवेगात्मकाभिव्यक्तये अवसरा अपि दातुं शक्यते। एतेन संवेगात्मकप्रज्ञापरिपक्वताप्राप्तये छात्राः प्रस्तुताः भवन्ति। बालानां संवेगानामभिव्यक्तिर्नूनमेव कारणीया भवतिः एतस्याभावे मानसिकविकासोऽपि बाधितो भवितुमर्हति।

^ संवेगात्मकप्रज्ञाविकासज्ञानेन शिक्षकश्छात्राणां पुरतः प्रेरणास्पदमादर्शभूतञ्च व्यवहारंह्न कर्तुं प्रभवति। एतेन परम्परया छात्रा अपि संवेगाभिव्यक्तेः विधाभिः परिचिताः भवन्ति, स्वयञ्च संवेगानां सफलं प्रयोगं कुर्वन्ति। शिक्षको बालकानां संवेगानामभिव्यक्तौ परिष्कारेऽपि कर्तुं शक्नोति। येन यथासमयं बालकानां सर्वाङ्गीणविकासो भवितुमर्हति। एतत्तु शिक्षायाः भवत्युद्देश्यम्। संवेगात्मकाभिव्यक्तेरुपयोगः अधिगमेऽपि शिक्षकः कर्तुं शक्नोति। एवं संवेगात्मकप्रज्ञाविकासस्य शैक्षिकं महत्वं सिद्ध्यति।

किशोरावस्थायां संवेगास्तीव्राः भवन्ति। तेष्वस्थिरता छत्राणां विकासे बाधिका भवितुमर्हति। संवेगात्मकप्रज्ञा विकासस्य ज्ञानेन किशोराणां संवेगानामार्गान्तरीकरणं दमनं निषेधं वा कर्तुं शक्यते। एतेन तेषां सकारात्मकेषु संवेगेषु सक्रियतायाः विकासो भवति, किशोराणाञ्च सर्वाङ्गीणं समविकासं कर्तुं शक्यते।

## सन्दर्भाः-


1.शिक्षामनोविज्ञानम्

2. आधुनिकं शिक्षामनोविज्ञानम्

3. शिक्षामनोविज्ञानम्

4. प्रगतशिक्षामनोविज्ञान

5. अमरकोश

6.हलायुद्धकोश

7. अर्थशास्त्रम्

8. मनोविज्ञान का ऐतिहासिकपरिप्रेक्ष्य